# विश्वविद्यालयप्राङ्गणे श्रीजगन्नाथरथयात्रा

## CAR FESTIVAL OF LORD SRI JAGANNATH IN UNIVERSITY COMPOUS

### दिनाङ्कः - २४.०७.२०२०

प्रतिसंवत्सरम् आषाढमास-शुक्लपक्ष-द्वितीयातिथौ ओडिशाराज्यस्य सुप्रसिद्धे पुरुषोत्तमक्षेत्रे श्रीजगन्नाथमहाप्रभोः रथयात्रा महता वैभवेन परिपाल्यते। तदवसरे देशविदेशेषु निर्मितेषु सर्वेषु जगनाथमन्दिरेष्वपि उत्सवस्यास्य परिपालनं तद्भक्तगणैरवश्यं क्रियते। महतः सौभाग्यस्य विषयोऽयं यत् नियतपवित्रिते विद्यापीठप्राङ्गणे प्रतिष्ठापिते उत्कलपीठे विद्यमानानां श्रीजगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनाख्यां चतुर्विधमूर्तीनां रथयात्रामहोत्सवः ऐषमः 24.07.20 दिनाङ्के परिपालितः। विविध-वैदिकमन्त्रैः नानावस्त्रालंकारविभूषितानां विग्रहाणां मन्दिरसिंहासनात् आनीय (पहण्डिद्वारा) रथोपरि संस्थापनमक्रियत। श्रीविग्रहाणां रथोपरि आनयनं "पहण्डि विजे" इति कथ्यते। तत्र विधानानुसारं पुर्यां यथा गजपतिमहाराजः स्वर्णमार्जन्या रथपरिष्करणं करोति तथैव विद्यापीठस्य प्रमुखाधिकारिणः कुलपतयः रथमार्जनमकुर्वन्। एवं साटोपं रथयात्रा विद्यापीठपरिसरे आयोयिता। यात्रायामस्यां विद्यापीठस्य कुलपतयः कुलसचिवाः अधिकारिणः अध्यापकाः कर्मचारिणः छात्राश्च भागमगृह्णन्।









